श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ त्रयोदशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रयोदशः सर्गः ॥

## राज्ञो विलापः कैकेयीं प्रति तस्यानुनयो विनयश्च

अतदर्हं महाराजं शयानमतथोचितम्।
ययातिमिव पुण्यान्ते देवलोकात् परिच्युतम्॥ **2.13.1** ॥

अनर्थरूपासिद्धार्था ह्यभीता भयदर्शिनी।
पुनराकारयामास तमेव वरमङ्गना॥ **2.13.2** ॥

त्वं कत्थसे महाराज सत्यवादी दृढव्रतः।
मम चेदं वरं कस्माद् विधारयितुमिच्छसि॥ **2.13.3** ॥

एवमुक्तस्तु कैकेय्या राजा दशरथस्तदा।
प्रत्युवाच ततः क्रुद्धो मुहूर्तं विह्वलन्निव॥ **2.13.4** ॥

मृते मयि गते रामे वनं मनुजपुङ्गवे।
हन्तानार्ये ममामित्रे सकामा सुखिनी भव॥ **2.13.5** ॥

स्वर्गेऽपि खलु रामस्य कुशलं दैवतैरहम्।
प्रत्यादेशादभिहितं धारयिष्ये कथं बत॥ **2.13.6** ॥

कैकेय्याः प्रियकामेन रामः प्रव्राजितो वनम्।
यदि सत्यं ब्रवीम्येतत् तदसत्यं भविष्यति॥ **2.13.7** ॥

अपुत्रेण मया पुत्रः श्रमेण महता महान्।
रामो लब्धो महातेजाः स कथं त्यज्यते मया॥ **2.13.8** ॥

शूरश्च कृतविद्यश्च जितक्रोधः क्षमापरः।
कथं कमलपत्राक्षो मया रामो विवास्यते॥ **2.13.9** ॥

कथमिन्दीवरश्यामं दीर्घबाहुं महाबलम्।
अभिराममहं रामं स्थापयिष्यामि दण्डकान्॥ **2.13.10** ॥

सुखानामुचितस्यैव दुःखैरनुचितस्य च।
दुःखं नामानुपश्येयं कथं रामस्य धीमतः॥ **2.13.11** ॥

यदि दुःखमकृत्वा तु मम सङ्क्रमणं भवेत्।
अदुःखार्हस्य रामस्य ततः सुखमवाप्नुयाम्॥ **2.13.12** ॥

नृशंसे पापसङ्कल्पे रामं सत्यपराक्रमम्।
किं विप्रियेण कैकेयि प्रियं योजयसे मम॥ **2.13.13** ॥

अकीर्तिरतुला लोके ध्रुवं परिभविष्यति।
तथा विलपतस्तस्य परिभ्रमितचेतसः॥ **2.13.14** ॥

अस्तमभ्यागमत् सूर्यो रजनी चाभ्यवर्तत।
सा त्रियामा तदार्तस्य चन्द्रमण्डलमण्डिता॥ **2.13.15** ॥

राज्ञो विलपमानस्य न व्यभासत शर्वरी।
सदैवोष्णं विनिःश्वस्य वृद्धो दशरथो नृपः॥ **2.13.16** ॥

विललापार्तवद् दुःखं गगनासक्तलोचनः।
न प्रभातं त्वयेच्छामि निशे नक्षत्रभूषिते॥ **2.13.17** ॥

क्रियतां मे दया भद्रे मयायं रचितोऽञ्जलिः।
अथवा गम्यतां शीघ्रं नाहमिच्छामि निर्घृणाम्॥ **2.13.18** ॥

नृशंसां केकयीं द्रष्टुं यत्कृते व्यसनं मम।
एवमुक्त्वा ततो राजा कैकेयीं संयताञ्जलिः॥ **2.13.19** ॥

प्रसादयामास पुनः कैकेयीं राजधर्मवित्।
साधुवृत्तस्य दीनस्य त्वद्गतस्य गतायुषः॥ **2.13.20** ॥

प्रसादः क्रियतां भद्रे देवि राज्ञो विशेषतः।
शून्ये न खलु सुश्रोणि मयेदं समुदाहृतम्॥ **2.13.21** ॥

कुरु साधुप्रसादं मे बाले सहृदया ह्यसि।
प्रसीद देवि रामो मे त्वद्दत्तं राज्यमव्ययम्॥ **2.13.22** ॥

लभतामसितापाङ्गे यशः परमवाप्स्यसि।
मम रामस्य लोकस्य गुरूणां भरतस्य च।
प्रियमेतद् गुरुश्रोणि कुरु चारुमुखेक्षणे॥ **2.13.23** ॥

विशुद्धभावस्य हि दुष्टभावा दीनस्य ताम्राश्रुकलस्य राज्ञः।
श्रुत्वा विचित्रं करुणं विलापं भर्तुर्नृशंसा न चकार वाक्यम्॥ **2.13.24** ॥

ततः स राजा पुनरेव मूर्छितः
    प्रियामतुष्टां प्रतिकूलभाषिणीम्।
समीक्ष्य पुत्रस्य विवासनं प्रति
    क्षितौ विसंज्ञो निपपात दुःखितः॥ **2.13.25** ॥

इतीव राज्ञो व्यथितस्य सा निशा
    जगाम घोरं श्वसतो मनस्विनः।
विबोध्यमानः प्रतिबोधनं तदा
    निवारयामास स राजसत्तमः॥ **2.13.26** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे त्रयोदशः सर्गः॥